श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे सप्तदशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे सप्तदशोऽध्यायः ॥

श्रीशुक उवाच
तत्र भगवतः साक्षाद्यज्ञलिङ्गस्य विष्णोर्विक्रमतो
वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरेणा -
न्तःप्रविष्टा या बाह्यजलधारा तच्चरणपङ्कजा -
वनेजनारुणकिञ्जल्कोपरञ्जिताखिलजगदघ -
मलापहोपस्पर्शनामला साक्षाद्भगवत्पदी -
त्यनुपलक्षितवचोऽभिधीयमानातिमहता
कालेन युगसहस्रोपलक्षणेन दिवो
मूर्धन्यवततार यत्तद्विष्णुपदमाहुः ॥ 1 ॥

यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतो -
ऽस्मत्कुलदेवताचरणारविन्दोदकमिति यामनुसवन -
मुत्कृष्यमाणभगवद्भक्तियोगेन दृढं
क्लिद्यमानान्तर्हृदय औत्कण्ठ्यविवशामीलित -
लोचनयुगलकुड्मलविगलितामलबाष्पकलयाभिव्यज्य -
मानरोमपुलककुलकोऽधुनापि परमादरेण शिरसा
बिभर्ति ॥ 2 ॥

ततः सप्त ऋषयस्तत्प्रभावाभिज्ञा यां ननु तपस
आत्यन्तिकी सिद्धिरेतावती भगवति सर्वात्मनि

वासुदेवेऽनुपरतभक्तियोगलाभेनैवो -
पेक्षितान्यार्थात्मगतयो मुक्तिमिवागतां मुमुक्षव
इव सबहुमानमद्यापि जटाजूटैरुद्वहन्ति ॥ 3 ॥

ततोऽनेकसहस्रकोटिविमानानीकसङ्कुलदेवयानेना -
वतरन्तीन्दुमण्डलमावार्य ब्रह्मसदने निपतति ॥ 4 ॥

तत्र चतुर्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिश -
मभिस्पन्दन्ती नदनदीपतिमेवाभिनिविशति
सीतालकनन्दा चक्षुर्भद्रेति ॥ 5 ॥

सीता तु ब्रह्मसदनात्केसराचलादिगिरिशिखरेभ्यो -
ऽधोऽधः प्रस्रवन्ती गन्धमादनमूर्धसु पतित्वान्तरेण
भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्र -
मभिप्रविशति ॥ 6 ॥

एवं माल्यवच्छिखरान्निष्पतन्ती ततोऽनुपरतवेगा
केतुमालमभि चक्षुः प्रतीच्यां दिशि सरित्पतिं
प्रविशति ॥ 7 ॥

भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखरा -
द्गिरिशिखरमतिहाय शृङ्गवतः शृङ्गादवस्यन्द -
माना उत्तरांस्तु कुरूनभित उदीच्यां दिशि जलधि -
मभिप्रविशति ॥ 8 ॥

तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि
गिरिकूटान्यतिक्रम्य हेमकूटाद्धैमकूटान्यति -
रभसतररंहसा लुठयन्ती भारतमभिवर्षं
दक्षिणस्यां दिशि जलधिमभिप्रविशति यस्यां स्नानार्थं

चागच्छतः पुंसः पदे पदेऽश्वमेधराजसूयादीनां
फलं न दुर्लभमिति ॥ 9 ॥

अन्ये च नदा नद्यश्च वर्षे वर्षे सन्ति बहुशो
मेर्वादिगिरिदुहितरः शतशः ॥ 10 ॥

तत्रापि भारतमेव वर्षं कर्मक्षेत्रमन्यान्यष्ट
वर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि
भौमानि स्वर्गपदानि व्यपदिशन्ति ॥ 11 ॥

एषु पुरुषाणामयुतपुरुषायुर्वर्षाणां देव -
कल्पानां नागायुतप्राणानां वज्रसंहननबलवयो -
मोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गवर्ष -
धृतैकगर्भकलत्राणां तत्र तु त्रेतायुगसमः
कालो वर्तते ॥ 12 ॥

यत्र ह देवपतयः स्वैः स्वैर्गणनायकैर्विहित -
महार्हणाः सर्वर्तुकुसुमस्तबकफलकिसलय -
श्रियाऽऽनम्यमानविटपलताविटपिभिरुपशुम्भमान -
रुचिरकाननाश्रमायतनवर्षगिरिद्रोणीषु तथा
चामलजलाशयेषु विकचविविधनववनरुहामोदमुदित -
राजहंसजलकुक्कुटकारण्डवसारसचक्रवाकादिभि -
र्मधुकरनिकराकृतिभिरुपकूजितेषु जलक्रीडादिभि -
र्विचित्रविनोदैः सुललितसुरसुन्दरीणां
कामकलिलविलासहासलीलावलोकाकृष्टमनो -
दृष्टयः स्वैरं विहरन्ति ॥ 13 ॥

नवस्वपि वर्षेषु भगवान्नारायणो महापुरुषः
पुरुषाणां तदनुग्रहायात्मतत्त्वव्यूहेनात्मना -
द्यापि सन्निधीयते ॥ 14 ॥

इलावृते तु भगवान् भव एक एव पुमान्न ह्यन्य -
स्तत्रापरो निर्विशति भवान्याः शापनिमित्तज्ञो
यत्प्रवेक्ष्यतः स्त्रीभावस्तत्पश्चाद्वक्ष्यामि ॥ 15 ॥

भवानीनाथैः स्त्रीगणार्बुदसहस्रैरवरुध्यमानो
भगवतश्चतुर्मूर्तेर्महापुरुषस्य तुरीयां तामसीं
मूर्तिं प्रकृतिमात्मनः सङ्कर्षणसंज्ञामात्मसमाधि -
रूपेण सन्निधाप्यैतदभिगृणन् भव उपधावति ॥ 16 ॥

श्रीभगवानुवाच
ओं नमो भगवते महापुरुषाय सर्वगुणसङ्ख्या -
नायानन्तायाव्यक्ताय नम इति ॥ 17 ॥

भजे भजन्यारणपादपङ्कजं
    भगस्य कृत्स्नस्य परं परायणम्।
भक्तेष्वलं भावितभूतभावनं
    भवापहं त्वा भवभावमीश्वरम् ॥ 18 ॥

न यस्य मायागुणचित्तवृत्तिभि -
    र्निरीक्षतो ह्यण्वपि दृष्टिरज्यते।
ईशे यथा नोऽजितमन्युरंहसां
    कस्तं न मन्येत जिगीषुरात्मनः ॥ 19 ॥

असद्दृशो यः प्रतिभाति मायया
    क्षीबेव मध्वासवताम्रलोचनः।

न नागवध्वोऽर्हण ईशिरे ह्रिया
यत्पादयोः स्पर्शनधर्षितेन्द्रियाः ॥ **20** ॥

यमाहुरस्य स्थितिजन्मसंयमं
त्रिभिर्विहीनं यमनन्तमृषयः।
न वेद सिद्धार्थमिव क्वचित्स्थितं
भूमण्डलं मूर्धसहस्रधामसु ॥ **21** ॥

यस्याद्य आसीद् गुणविग्रहो महान्
विज्ञानधिष्ण्यो भगवानजः किल।
यत्सम्भवोऽहं त्रिवृता स्वतेजसा
वैकारिकं तामसमैन्द्रियं सृजे ॥ **22** ॥

एते वयं यस्य वशे महात्मनः
स्थिताः शकुन्ता इव सूत्रयन्त्रिताः।
महानहं वैकृततामसेन्द्रियाः
सृजाम सर्वे यदनुग्रहादिदम् ॥ **23** ॥

यन्निर्मितां कर्ह्यपि कर्मपर्वणीं
मायां जनोऽयं गुणसर्गमोहितः।
न वेद निस्तारणयोगमञ्जसा
तस्मै नमस्ते विलयोदयात्मने ॥ **24** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे सप्तदशोऽध्यायः ॥